नं. ५०६१

निरुक्तम् पूर्वार्द्धकं.

श्री यास्कः

पत्र. ६५ —— सं. १६४१.

वेदांगम्

© Dharmartha Trust J&K. Digitized by eGangotri

निरुक्तपूर्वार्धम्

५०६९

5069

F-95

५ब

© Dharmartha Trust J&K. Digitized by eGangotri

श्रो: पत्रे
१६२

॥श्रीमद्याज्ञिकदेवहस्तस्येदंपुस्तकं पत्रं॥ वि[illegible] पक्षे [illegible]

॥निरुक्तसंपूर्णंअध्यायत्रयोदश १६७॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥श्रीगणेशाय नमः॥ श्रीविश्वेश्वरः सत्यस्त्वे॥ ॐ॥ ॥समाम्नायः समाम्नातः स व्याख्यातव्य
स्तमिमं समाम्नायं निघंटव इत्याचक्षते॥ निघंटवः कस्मान्निगमा इमे भवंति॥ छंदोभ्यः
समाहृत्य समाहृत्य समाम्नातास्ते निगंतव एव संतो॥ निगमनान्निघंटव उच्यंत इत्यौप
मन्यवो॥ पि वाहननादेव स्युः॥ समाहता भवंति॥ यद्वा समाहृता भवंति॥ तद्यान्येतानि च
त्वारि पदजातानि॥ नामाख्याते चोपसर्गनिपाताश्च॥ तानीमानि भवंति॥ तत्रैतन्नामा
ख्यातयोर्लक्षणं प्रदिशंति॥ भावप्रधानमाख्यातं॥ सत्वप्रधानानि नामानि॥ तद्यत्रोभेना

© Dharmartha Trust J&K. Digitized by eGangotri

व्यपधानेऽभवतः॥ पूर्वापरीभूतं भावमाख्यातेनाचष्टे॥ व्रजति पचतीत्युपक्रमप्रभृत्यपवर्ग-
पर्यन्तं॥ मूर्तं सत्त्वभूतं सत्त्वनामभिर्॥ व्रज्या पक्तिरि॥५॥ त्यद इति सत्त्वानामुपदेशः॥१॥ गौरश्वः
पुरुषो हस्तीति॥ भवतीति भावस्य॥ आस्ते शेते व्रजति तिष्ठतीति॥ इन्द्रियनित्यं वचनमौदुम्बरा-
यणस्तत्र चतुष्ट्वं नोपपद्यते॥ युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः॥ शास्त्रकृतो
योगश्च॥ व्याप्तिमत्त्वात्तु शब्दस्या॥५॥ णीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके॥ ते-
षां मनुष्यवद्देवताभिधानं॥ पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मन्त्रो वेदे॥२॥ षड्भावविका

© Dharmartha Trust J&K. Digitized by eGangotri

काराभवंतीति॥ वार्ष्यायणिः॥ जायतेस्ति विपरिणमते॥ वर्द्धते पक्षीयते विनश्यतीति॥ जा
यत इति पूर्वभावस्यादिमाचष्टे॥ नापरभावमाचष्टे॥ न प्रतिषेधति॥५॥ अस्तीत्युत्पन्नस्य स
त्वस्यावधारणं॥ विपरिणमत इत्यप्रच्यवमानस्य तत्वाद्विकारं॥ वर्द्धत इति स्वांगाभ्यु
च्चयं॥ सांयोगिकानां वार्थानां॥ वर्द्धते विजयेनेति वा॥ वर्द्धते शरीरेणेति वा॥ पक्षीयत इत्ये
तेनैव व्याख्यातः प्रतिलोमं॥ विनश्यतीत्यपरभावस्यादिमाचष्टे॥ न पूर्वभावमाचष्टे॥
न प्रतिषेधति॥ अतोन्ये भावविकारा। एतेषामेव विकारा भवंतीति ह स्माह॥ ते यथा

© Dharmartha Trust J&K. Digitized by eGangotri

वचनमस्पृहितव्यां॥ न निर्बद्धा उपसर्गा ऽर्थान्निराहुरिति शाकटायनो॥ नामाख्यातयो
स्तु कर्मोपसंयोगद्योतका भवं॥त्युच्चावचाः पदार्था भवंतीति गार्ग्य॥स्तद्य एषु पदार्थः प्रा
हुरिमे तं॥ नामाख्यातयोरर्थविकरणं।४। आ इत्यर्वागर्थे॥ प्र परेत्येतस्य प्रातिलोम्य॥
मभीत्याभिमुख्यं॥ प्रतीत्येतस्य प्रातिलोम्यं॥ मति स्वित्यभिपूजितार्थे॥ निर्दुरित्येतयोः
प्रातिलोम्यं॥ न्यवेति विनिग्रहार्थीयौ॥ उदित्येतयोः प्रातिलोम्यं॥ समित्येकीभावं॥ व्यपे
त्येतस्य प्रातिलोम्यं॥ मन्विति सादृश्यापरभावं॥ मपीति संसर्गं॥ मुपेत्युपजनं॥ परीति

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वतोस्ताव॥ मे धील्युपरि स्ताव॥ मे श्वर्यैवेवमु स्त्राववानर्पो॥ न्त्राकुंस्तउपेस्थितव्याः॥५॥
त्रपमः पादः॥ ॥ अपनिपाताँ॥ उ स्त्राव चेषर्वेषु निपत्येतें॥ कप मार्थपि कर्मोपसंग्र
हार्थपि पदपूरणास्तेषामेते चत्वार उपमार्थे॥ न वं॥ ती वेति ताषायां वान्वध्यायं॥ वा
मिरिवेंद्र इवेति॥ नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायं॥ नेंद्रं देवममंसत
नेति प्रतिषेधार्थीयः पुरस्तादुपाचार स्तस्य यत्प्रतिषेधति॥ दुर्मदासो न सुरा
यामित्युपमार्थीय उपरिष्टादुपाचारस्तस्य॥ ये नोपमिमीते॥ चिदित्येषोऽनेककर्मा॥ ३।

© Dharmartha Trust J&K. Digitized by eGangotri

वार्यश्चिदिदं ब्रूयादिति पूजायां ॥५॥ मा वार्य उपाचारं ग्राहयस्व ॥५॥ आचिनोत्यर्पानाचिनोति बुद्धि
मिति ॥ वा ॥ द्वौधि विदित्सुपमार्थे कुल्माषांश्चिदाहर इत्यव कुक्षिते ॥ कुल्माषाः कुलेषु सीदन्ति
नुदत्येषां नेककर्मदं नु करिष्यतीति ॥ हेत्वपदेशे ॥ कथं नु करिष्यतीत्यनुपृष्टे ॥ नन्वेलद
काषीरिति ॥ वा ॥ ८ ॥ पाप्नुपमार्थे न्ववंतितारा बृहस्पतिं नुते पुरुहूतवयाः ॥ बृहस्पवं ते पुरुहू
तशाखा ॥ वयाः शाखा ॥ वेते वा ॥ यनाज्ञवंति ॥ शाखाः स्वशायाः शाक्नोते वा ॥ ॥ यस्याग
मादर्थ पूप कमहविज्ञायते ॥ न लोढ्दृश्यिकामिवा ॥ वियग्रहणपूप क्काचकर्मोपसंग्रह ॥

© Dharmartha Trust J&K. Digitized by eGangotri

श्वातिसमुच्चयार्थ उत्तास्मां संप्रयुज्यते । अग्रे हं वलं व हत्र हं नित्ये तस्मिन्नेवार्थी दे वे संश्च

पिद्रस्य एत्याकारो वेति विचारणार्थी इदं ताहं पृथिवीमिमां निदधानीस्ववेहवै त्यपा

पि समुच्चयार्थ ऊनवेति । वायुर्वाचामनुवीत्त्वेति । अश्रग्रे हद्इ तिव हद्इ । तिच विनियद्दा

वीयौ पूर्वेण संप्रयुज्येते । अग्रे यमहे इं करोत्वयमिदमिदं हकारिष्यतीदं नुकरिष्य

तीत्यपाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषमेवदंति सत्यमुतेवदंतीत्यपापिप

दपूरण इदमुतदुहीत्येषानेककर्मेदं हिकरिष्यतीति हेत्वपदेशो कपं हिकारि

© Dharmartha Trust J&K. Digitized by eGangotri

ष्यतीत्यनुपृष्टे ॥ कपं द्विव्याकरिष्यतीत्यसूयायां ॥ किलेति विद्याप्रकर्षे ॥ एवं किलेत्य ॥५॥ पापिन
ननु इत्येताभ्यां संप्रयुज्यते ॥५॥ नुपृष्टे ॥ न किलैवं ननु किलैवं ॥ मेति प्रतिषेधे ॥ माकार्षीर्मा हा
र्षीरिति च ॥ खलू विति च ॥ खलु कृत्वा खलु कृतं ॥५॥ म पापि पदपूरणे ॥ एवं खलु तद्बभूवेति
शश्वदिति विचिकित्सार्थीयो भाषायां ॥ शश्वदेवमित्यनुपृष्टे ॥ एवं शश्वदित्यस्वयंपृष्टे ॥
नूनमिति विचिकित्सार्थीयो भाषायां ॥ ३ ॥ उभयमन्वध्यायं ॥ विचिकित्सार्थीयश्च पदपूरणे
श्च ॥६॥ गस्त्य इन्द्राय हविर्निरुप्य ॥ मरुद्भ्यः संप्रदित्सां चकार ॥ स इन्द्र एत्य परिदेवयां चक्रे ॥४॥९॥

© Dharmartha Trust J&K. Digitized by eGangotri

शिव

।ननूनमस्तिनोश्वःकस्तद्वेदयदद्भुतं।अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्यति।ननू
नमस्त्यघतनेनोएवश्वस्तनेमघासिंघविघूरि त्यक्ष्णोनामधेयंघोततइतिसतः।श्व
उपाशंसनीयःकालोह्योहीनःकालः।कस्तद्वेदयदद्भुतं।कस्तद्वेदयदनूतमिदमपी
तरदद्भुतमनूतमितिवा।अन्यस्यचित्तमभिसंचरेण्यमभिसंचार्यंज्ञोनानेयःश्चित्तंने
ततेरुताधीतंविनश्यतीत्याध्यातमभित्रेतमपापिपदपूरणः।पानूनंसातत्रातिव
रंज्ञः।मित्रैर्दुहीयदिंद्रदक्षिणामघोनी।।त्रिस्तांस्तोत्रस्योमातिधग्न्यगोनोद्वेददू

© Dharmartha Trust J&K. Digitized by eGangotri

देमविदपेसुवीर्यां॥ स्मातेप्रतिदुग्धांवरं ऊरित्रे॥ वरोवरयितव्योभवति॥ ऊरितागरितादक्षिणामघोनीमघवती॥ मघमितिधननामधेयं॥ मंहतेर्दानकर्मणो॥ दक्षिणादक्षतेः समर्द्धयतिकर्मणो॥ व्यृद्धं समर्द्धयतीत्य॥ पिवाप्रदक्षिणागमनाद्दिशमभिप्रेत्य॥ दिग्घस्तप्रकृतिर्॥ दक्षिणोहस्तो॥ दक्षतेरुत्साहकर्मणो॥ दाशतेर्वास्याद्दानकर्मणो॥ हस्तोहन्तेः प्राशुर्हनने॥ देहिस्तोत्रस्यः कामान्मा॥ स्मानतिदक्षीमी॥ स्मानतिदाय॥ दातजगोनो॥ अस्तु॥ वृहद्वदेमस्ववेदने॥ जगोतजऊते॥ वृहदितिमहतोनामधेयं॥

© Dharmartha Trust J&K. Digitized by eGangotri

परिवृत्त्वं नवति॥ वीरवेतः कल्याणवीरो वा॥ वीरो वीरयत्यमित्रान्॥ वेतेर्वा स्याद्गति
कर्मणो॥ वीरयतेर्वा॥ सीमिति परिग्रहार्थीयो वा पदपूरणो वा॥ प्रसीमादित्यो असृ
जत्॥ प्रासृजदिति वा॥ प्रासृजत्सर्वत इति वा॥ विसीमतः सुरुचो वेन आवः॥ इ
ति च॥ व्यवृणोत्सर्वत आदित्यः॥ सुरुच आदित्यरश्मयः सुरोचनात्॥ अपि वा सीमेत्येत
दनर्थकमुपबंधमाददीत पंचमीकर्माणं॥ सीम्नः सीमतः सीमातो मर्यादातः॥
सीमा मर्यादा॥ विषीव्यति देशाविति॥ त्व इति विनिग्रहार्थीयं॥ सर्वनामानुदात्तमर्द्धना

© Dharmartha Trust J&K. Digitized by eGangotri

मित्येके । ऋ॰ ११ । ऋचांत्वः पोषमास्ते पुपुष्वान्गायत्रंत्वो गायति शक्वरीषु ब्रह्मात्वो वदति
जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः । इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामेकः
पोषमास्ते पुपुष्वान्होतर्ग्चनी गायत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायते
स्तुतिकर्मणः शक्वर्यऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धंतुं तच्छक्वरीणां शक्वरी
त्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्र
ह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो यज्ञस्य मात्रां विमीमित एकोऽध्वर्युरध्वर्यु

© Dharmartha Trust J&K. Digitized by eGangotri

रध्वर्युरध्वरंयुन क्त्यध्वरस्य नेताध्वरंकामयत इतिवापिवा धीयानेयुरुपबंधोध्वर इति
यज्ञनामध्वर इतिर्हिंसाकर्मा तत्प्रतिषेधोनिपातइत्येके तत्कपमनुदात्तप्रकृतिनामस्या
द्दष्टव्ययं तु स्नवति। उतत्वंसरव्येस्थिरपीतमाहुरितिद्वितीयायामुतो त्वस्मै तन्वं विसस्त्र
इति चतुर्थ्याम पापिग्रपमाबहुवचने। अत्र ह्न्यं तः कर्णवं तः सरवायोमनोजवेष्वस
माबभूवुः। आदघ्नासउपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेददृश्रे। अक्षिमं तः कर्ण
वं तोहि वहेरनक्षेरित्याग्रायणस्तस्मादेतेव्यक्ततर इवसवतइतिदृविज्ञायतेक

७॥

© Dharmartha Trust J&K. Digitized by eGangotri

णः॥ रूंततेन्निरुत्तद्वारोनवल्यच्छतेरित्याग्रायणः॥ रूच्छतीइवखेउदगंतामितिह विज्ञायते॥
मनसांप्रऊवेघसमाबत्तूवुरास्यदघ्नात्रपरंउपकह्दघ्नात्रपरंत्रास्यंमस्यतेरास्यै
द्दतएनदन्नमितिवादघ्नंदध्यतेमवतिकर्मणोदस्यतेर्वास्याद्विदस्ततरंत्तवतिप्र
स्नेयाददर्शिरेस्नानाहीकृदोद्भादते:शब्दकर्मणोक्काद्दतेर्वास्याछीतीनावकर्मणो
पापिसमुव्रयार्पुत्तर्ववितोपर्यायाइवत्वदाभ्विनमाश्विनंचपर्यायाश्चैत्यपयेप्रद्व
त्रेर्पीमिताहरेषुग्रंपेषुवाक्यपूरणाद्भागच्छेतिपदपूरणास्तेमिताहरेषुनर्पकाः

© Dharmartha Trust J&K. Digitized by eGangotri

कमीमिद्धिति। निष्ठ्वक्रा सध्रिचिदिं नरो नूरितो। काद्बकादिवा। विस्यस्यं तोवं वा। शिरं शि
शिरं ऊीवनायकं। शिशिरं ऊीवनायां। शिशिरं श्रएणा तेः श्रान्नाते वां। एमेनं सत्र जतासुते।
आसत ऊतै नं सुतो। तमिद्धं ई ऊनो गिरः। तं वर्द्धयं ऊनो गिरः। स्कतयों गिमो ग्रएण
तेः। अयमुतेसमं तसिां। अयं तेसमनसी वोपिद्दश्यते। १४। सुविदुरिवसु विज्ञाये
तेरवां। पापिनेत्येषरदिव्ये तेनां। संप्रयुज्यतेपरि नयो। दृविर्तिरं केस्वरितः। सर्वं तेसु
च्चतएकेसवनेषुसोमा नाशश्चीमदंतउत दक्षिणा निर्न्नेऊहायं त्योनरकं पतामेति।

© Dharmartha Trust J&K. Digitized by eGangotri

नरकं न्यरकं नीचैर्गमनं ॥ नास्मिन्रमणं स्थानमल्पमप्यस्तीति वा ॥५॥ पापि न चेत्येष दृश्यते ॥ संप्र
युज्यतेनुपृष्टे ॥ न चेत्सुरां पिबन्तीति ॥ सुरा सुनोतेः ॥ एवमुच्चावचेष्वर्थेषु निपतन्ति ॥ त उपेक्षित
व्याः ॥१०॥ द्वितीयः पादः ॥ २ ॥ इतीमानि चत्वारि पदजातान्यनुक्रान्तानि ॥ नामाख्याते चोपस
र्गनिपाताश्च ॥ तत्र नामान्याख्यातजानीति शाकटायनो ॥ नैरुक्तसमयश्च ॥ न सर्वाणीति गा
र्ग्यो ॥ वैयाकरणानां चैके ॥ तद्यत्र स्वरसंस्कारौ समर्थौ ॥ प्रादेशिकेन गुणेनान्वितौ स्यातां ॥
संविज्ञातानि तानि ॥ यथा गौरश्वः पुरुषो हस्तीति ॥८॥ अथ चेत्सर्वाण्याख्यातजानि नामानि

© Dharmartha Trust J&K. Digitized by eGangotri

स्वात

स्युर्यः क[illegible]श्च तत्कर्म कुर्यात्सर्वं तस्य तत्त्वं तपावचक्षीरन्यः कश्चाध्यानमश्नुवीतार्श्वः सवचनी
यस्याघं किंचित्तं घात्रणं तद्द पापिचेत्सर्वाण्याख्यातज्ञानिनामानि स्युर्योवद्धिर्त्तविः सं
त्रयुक्तेन तावद्ध्यो नामधेयः प्रतिलंनः स्यात्तत्रैवं स्थूणादर्शायावासंज्ञनीवस्यात् ॥ अपा
पियएषां न्यायवान्कामेना मिकः संस्कारो यथा चापिप्रतीतापीनि स्यु[illegible] स्त्वपे तान्यावद्धी
रं न्मुरुषं पुरिशायद्रत्यावद्धीरंनेष्टे तस्यं तद्दनमितिरणम पापिनिषंनोनित्याहारेसि
विचारयं तिप्रपनात्म पिवीत्याङ्कुः कएनामत्रपायिष्यां किमाधारश्चैतत्स्यपानन्वितेर्यक्षा

र्ष ।।

© Dharmartha Trust J&K. Digitized by eGangotri

देशिकेविकारे॥पदेभ्यःपदेतरार्द्धान्॥संस्कारशाकटायन॥एतेःकारितंचयकारादिंचांतकरणं॥

मस्तेःशुद्धंचसकारादिंच॥ऽथापिसत्वपूर्वोभावइत्याहुर॥परस्माद्भावात्पूर्वस्यप्रदेशोनोपप

द्यतइतितदेतन्नोपपद्यते॥यथोहिनुवाएतत्॥तद्यत्रस्वरसंस्कारौसमर्थौप्रादेशिकेन

गुणेनान्वितौस्यातां॥सर्वंप्रादेशिकमित्येवंसत्यनुपालंभएषभवति॥यथोएतद्यःकश्चत

त्कर्मकुर्यात्॥सर्वंतत्सत्त्वंतथाचक्षीरन्निति॥पश्यामःसमानकर्मणांनामधेयप्रतिलंभ॥

मेकेषांनैकेषां॥यथातक्षापरिव्राजको॥जीवनोभूमिजइत्येतेनैवोत्तरःप्रत्युक्तो॥यथो

© Dharmartha Trust J&K. Digitized by eGangotri

षोएतद्घपानापिग्र ताना र्पा निस्सु॥ स्तपैतान्याचक्षीरं न्निति॥ संत्यत्सप्रयोगाः स्ततोप्येकपदि
कां॥ यषाव्रततत्तिर्दमूनाज्ञायग्ध्वज्ञाह्लारो॥ ज्ञागरूकोदर्विहोमीति॥ यषोएतानिषं न्नेनित्यास्ता
रसिविचारयंतीति॥ नवतीहि न्निषन्नेनित्याहार्योगपरीष्टिः॥ त्रपनात्स्य पृथ्वीत्याकुः॥
कएनामघ्रपयिषा॥ किमाधारश्चे॥ सपचैदर्शनेनषुर॥ त्रपितावेदप्यन्यैः॥ अत्रषा
ष्यवंसर्वेएवदृष्टघ्रवादाउपालस्यंते॥ यषोएनत्॥ पदेस्यः पदेतराद्धुंसंनस्कारेति॥ यो
नन्वितेर्षेसंचस्कार॥ सतेनग हिः॥ सैषापुरुषगर्हा॥ यषोएतदर्पऽरस्माङ्गावात्पूर्वस्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

देशो नोपपद्यत इति॥ पश्यामः पूर्वोत्पन्नानां सत्वानां॥ अपरस्माद्भावां नामधेयप्रतिलंभ

मेकेषां नैकं यथा बिल्वादो लंबचूलक इति॥ बिल्वं भरणाद्वा भेदनाद्वा।४। अथापीदमं

तरेण मंत्रेष्वर्थप्रत्ययो न विद्यते॥ अर्थमप्रतीयतो नात्यंतं स्वरसंस्कारोद्देशः॥ तदिदं विद्या

स्थानं व्याकरणस्य कार्त्स्न्यं॥ स्वार्थसाधकं च॥ यदि मंत्रार्थप्रत्ययायानर्थकं भवतीति

कौत्सोऽनर्थका हि मंत्राः॥ तदेतेनोपेक्षितव्यं॥ नियतवाचो युक्तयो नियतानुपूर्व्या भवंत्य

थापि ब्राह्मणेन रूपसंपन्ना विधीयंते॥ उरु प्रथस्वेति प्रथयति॥ प्रोहाणीति प्रोहति॥

© Dharmartha Trust J&K. Digitized by eGangotri

पाप्मनुपपन्नायां न भवंति। उषधे त्रायस्वैनं स्वधिते मैनं हिंसीरित्याह। हिंसन्न पाप्मिविप्रतिषिद्धा
यां न भवंति। एक एव रुद्रो न द्वितीयः। असंख्याता सहस्राणि ये रुद्रा अधि भूम्यां। अश
त्रुरिंद्र जज्ञिषे शत्रुं सेनान्यः। ऊय स्त्राकमिंद्र इत्य पाप्मिज्ञानं तं सेग्रेष्य सन्नये समिध्यमा
नायानुब्रूहीत्य पाप्माहादितिः सर्वमिति। अदितिर्द्यौरदितिरंतरिक्षमिति। तदुपरि
ष्टाद्व्याख्यास्यामो। पाप्मविस्पष्टा यां न भवंत्य मग्याहृ श्मिंजारयायिकाणुकेलपर्वतंतःश
रस्सामान्यादैत्तदैयज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति

© Dharmartha Trust J&K. Digitized by eGangotri

त्ब्राह्मणं । पौ । क्रीतं तौ पुत्रै र्नं शुश्रिरि । ति ॥ य पाएतं । नियतवा चोयुक्तो यो । नियतानुपूर्व्यात्तवं
तीति ॥ लौकिकेष्वप्येत । घ पेंद्राग्नी पितापुत्रा विति ॥ य पाएतद्ब्राह्मणेन रूपसंपन्नाविधीयं
तइत्युदितानुवादः स्तत्रवति ॥ य पाएतं । दनुपपन्नापान्तवंतीत्याम्नायवचनादहिंसाघ्नतीयें
तं ॥ य पाएतद्विघ्नतिषिद्धापांत्तवंतीति ॥ लोकिकेष्वप्येतं । घपासपत्नो यं ब्राह्मणेनं । मित्रो
राजेति ॥ य पाएतं । ज्ञानं तं संप्रेष्यतीति ॥ ज्ञानं तमात्तियादपतैं ज्ञानतेमधुपर्कं ग्राहं ॥ य
पाएतं ॥ ददिति : सर्वमिति । लोकिकेष्वप्येतं । घपासर्वरसान्नुग्राह्या : पानीयमिति ॥ यपा

© Dharmartha Trust J&K. Digitized by eGangotri

एतदेव विसष्ठ्यापि न भवंतीति नैष स्थाणोर् अपराधो यदेनमंधो न पश्यति पुरुषापराधः स भवति यथा ज्ञानपदीषु विघातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भूयो विद्यः प्रशस्यो भवति॥ इति तृतीयः पादः॥ अथापीदमंतरेण पदविभागो न विद्यतेऽवसायपद्वतेरुद्रस्येति पद्वत् अवसं गावः पथ्यदनमवतेर्गत्यर्थस्यासो नामकरणस्तस्मान्नावगृह्णंति अवसाय पश्यानिति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णंति दूतो निर्वत्याइदमाऽगमेति पंचम्यर्थप्रेक्षावा षष्ठ्यर्थप्रेक्षावा। कारांतोपरो

© Dharmartha Trust J&K. Digitized by eGangotri

निरूह्या [illegible] श्चानस्त्वेति। वचत्तुर्य्यपप्रेह्वे कारांतं परः संनिकर्षः संहि ता पदप्रकृ
तिः संहिता पदप्रकृती। निसर्वेचरणानां पार्षदान्यपापियाज्ञे दैवतेन बहवः प्रदेशा
नवंति तद्दैतेनोपेक्षितव्यं। तेचेंद्र युलिंगज्ञात्यत्रं स्मइति। इदंन्नत्वाशावंसादेवतांवा
युंप्रणंनीति। वायुलिंगं चेंद्रालिंगं चाग्नेये मंत्रे। अग्निरिव मन्यो त्विषितः सहस्वेत्यपा
ग्निर्मान्य वे मंत्रे। त्विषितोज्ज्वलितः। त्विषिरित्यप्यस्य दीप्तिर्नाम नवत्यपापिज्ञानत्र
शंसानवत्यं ज्ञाननिदा चा २२ । स्मात्पुरएयेनोरद्वारः किलासूद्धीलवेदंनविज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

नास्ति योर्पी । योर्पैञ्छइस कलं नद्रम श्रूतेनाकामतिं ला नविधूतपाप्मा यङ्ढीतमविज्ञा
तो निगदेनैव शाब्यते । अत्र नन्याविवेश्रुष्कैधो नतज्ज्वलति कर्हि विनास्छाणु स्तिष
तेरर्पीत्रैररणस्छोवा ॥३॥ उतत्वः पश्यंनददर्शवाचमुतत्वः शृण्वंनशृणोत्येनां । उतो
त्वस्मै तन्वं१ विसस्रे जायेव पत्य उशती सुवासाः ॥ अप्येकः पश्यंन पश्यति वाचमपि
च शृण्वंनशृणोत्येनामित्यविद्वांसमाहार्धमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं
विवृणुते ज्ञानं ॥ प्रकाशनमर्थस्याहानया वाचो ॥ पमोत्तमया वाचा ॥ जायेव पत्ये काम

© Dharmartha Trust J&K. Digitized by eGangotri

यमानासुवासान्ऋतुकालेषु यथासए नां पश्यन्ति सम्यग्णोनील्यर्पद्मप्रशंसान्तस्योत्तरान्नूयसेनि

विन्नाय॥२७॥उन्नतत्वं सरत्येस्थिर पीनमाङ्गुनैनंहि चेत्यपि यादिनेषु। अधेन्वावरति मायये

षं वावंश्रुश्रुवां अफलामपुष्पां। अप्येकं वा क्तरत्येस्थिर पीनमाङ्गुर ममाणंविपीतार्थं

दिवसरत्येर मणीयेस्थानर् तियां विज्ञातार्थं यत्नानुवर्तियाङ्गुं येषु बलवत्त्वं पत्ये धेन्वा

रवेषवरतिमाययायाक्रप्रतिरूपयानास्मेकामांदुग्धेवाग्देशादेवमनुष्यस्थानेषु यो

वारेश्रुतवान्नवत्यं फलामपुष्पामित्यं फलास्मा अपुष्पावागन्नवतीतियाकिंचित्सुष्पफले

© Dharmartha Trust J&K. Digitized by eGangotri

नि. नै.
१० नै.

न्निव

फलमाहयाज्ञदैवतेपुष्प॰

तिर्वाचः पुष्पफले दैवताध्यात्मे वा [२५] साक्षात्कृतधर्माण ऋषयो बभूवुस्तेवरेभ्योसाक्षा
त्कृतधर्मभ्य उपदेशेनमंत्रान्संप्रादु [२७] रुपदेशाय ग्लायंतोवरे बिल्मग्रहणायेमं ग्रंथं समाम्ना
सिषुर्वेदं च वेदांगानि च बिल्मं भिल्मं भासनमिति वै [२८] तावंतः समानकर्माणो धातवो धातु
र्दधातेरेतावंत्यस्य सत्त्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघंटुकमिदं दे
वतानाम प्राधान्येनेदमिति तद्यदन्यदैवते मंत्रे निपतति नै [२६] घंटुकं तत् ॥ अश्वं न त्वा वार

१४॥

वंतं ॥ अश्वमिव त्वा वालवंतं वाला दंशवारणार्था भवंति दंशो दशतेः मृगो न भीमः कु

© Dharmartha Trust J&K. Digitized by eGangotri

चरोगिरिष्ठाः।मृगइवभीमःकुचरोगिरिष्ठाः।मृगोमार्ष्टेर्गतिकर्मणोभीमोबिभ्यत्यस्माद्भीष्मोप्ये
तस्माद्देवंकुचरइतिचरतिकर्मकुत्सितमपचेद्देवताभिधानंक्वायंनचरतीतिगिरिष्ठागि
रस्थायीगिरिःपर्वतःसमुद्गीर्णोभवतिपर्ववान्पर्वतःपर्वपुनःपृणातेःप्रीणातेर्वार्द्धमासप
र्वदेवानस्मिन्प्रीणंतीतितत्प्रकृतीतरत्संधिसामान्यान्मेघस्थायीमेघोपिगिरिरेतस्मा
देवतद्यानिनामानिप्राधान्यस्तुतीनांदेवतानांतद्दैवतमित्याचक्षतेतदुपरिष्टाद्व्याख्या
स्यामोनैघंटुकानिनैगमानिहेहाद्य॥२०॥इतिनिरुक्तेपूर्वःपादःप्रथमोध्यायः॥१॥उपानि

६७४:पाद

गुणानाय॥६

र्विवर्न्तेतघेषुपदेषुस्वरसंस्कारोसमर्प्यौ॥ ग्रादेशिकेनविकारेणाश्चितोस्यात्॥ तपातानिनि
र्भूयाद्॥५ पानश्चितेर्भ्रैग्रादेशिकेविकारे॥५ पीनित्यःपरीहेत॥ केनचिद्धृतिसामान्येना॥५ विद्यमाने
सामा न्येपदहरवर्णसामान्यान्निर्भूयान्नतेव ननिर्भूयान्॥ नसंस्कारमाद्रियेत॥ विषंयवस्योहिहंतयो
न्नवंतित्॥ यपार्श्वविन्नक्षीःसंन्नमये॥ वन्नमवन्नमितिधातोरादेशएवनिष्येतो॥ आत्रपाप्यस्तोर्निवृ
त्तिस्थाने॥५ घादिलोपोनवति॥ स्तःसेती॥५ त्यपाप्यंतलोपोनवति॥ गत्वागतमित्यपा॥५ पाप्युपधालो
पोनवति॥ ऊग्मतऊग्मुरि॥५ त्यपाप्युपधाविकारोनवति॥ राज्ञादंडी॥५ त्यपापिवर्णलोपोनवति॥

© Dharmartha Trust J&K. Digitized by eGangotri

नत्वा यामी॥ऽत्यपापि द्विवर्णलोपस्त्व इ॥ऽत्यपाप्यादिविपर्ययो भवति॥ ज्योतिर्ध्वनो बिंदुर्बाध्यर

॥ऽत्यपाप्याद्यंतविपर्ययो भवति। स्तोकार ऋजुः सिकता स्तर्क्वि॥ऽत्यपापंत व्यापत्तिर्भवति॥२॥

उद्घो मेघो नाधो गाधो वधूर्मधि॥ऽत्यपापि वर्णापऊनं। ज्ञास्छह्वारो नरू ऊर्नेति॥ तघत्रस्व

रादनंतरां तस्छां तर्द्धृ ह्वभवति। तद्विघस्रतीनां स्छानमिति प्रदिशंति॥ तत्र सिद्धायामनु

पपद्यमानायामितरयोपपिपादयिषेत्त्राप्येकु स्यनिष्पन्नयो भवंति॥ तघपैतद्दूति सि

दुःपष्पुःपषतःकुणारु मि॥ त्यपापि त्राषिकेस्यो धातुस्यो। नैगमाः ऋतो नाष्यंते। दमूनाः दे

© Dharmartha Trust J&K. Digitized by eGangotri

त्वसाधाइत्यपापि नैगमेस्यो त्राषिकाः उछं ह्रतमित्यपापि प्रलतयएकेषु त्राष्यंते विलत
एकेषु आशावतिर्गतिकर्मा कंबो ज्ञबेव त्राष्यंते कंबोजाः कंबलस्तोजाः कमनीयस्तोजा वा
कंबलः कमनीयो त्रवति विकारमस्यार्थेषु त्राषंते शवइति दातिर्लवनार्थे प्राच्येषु दात्र
मुदीच्येषु एवमेकपदानि निर्ब्रूयात् तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमप
रमपरं प्रविभज्य निर्ब्रूयात् दंडः पुरुषो दंडमर्हतीति वा दंडेन संपद्यत इति वा दंडो द
दातेर्धारयतिकर्मणो अक्रूरो ददते मणिमित्यभिभाषंते दमनादित्यौपमन्यवो दंड

© Dharmartha Trust J&K. Digitized by eGangotri

मस्याकर्षतीतिगर्हायां।४।कस्यारङ्कुरश्वस्य॥कद्धंसेववर्ते॥कल्होगाद्वर्ते॥कस्त इतिनामकरणः॥ ८
ख्यातेर्वानर्पकोस्यासः॥किमस्मिन्नख्यानमिति॥कर्षतेर्वा॥तत्सामान्यान्मनुष्यकद्रो॥वाङ्कुमू
लसामान्यादश्वस्य॥राज्ञःपुरुषोराजपुरुषः॥राजाराजतेः॥पुरुषःपुरिषादःपुरिश
यःपूरयतेर्वा॥पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य।यस्मात्परंनापरमस्तिकिंचिद्यस्मा
न्नाणीयोनज्यायोऽस्तिकिंचित्।वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्व
मित्युपिनिगमोभवति।५।विश्वकद्राकर्षो॥वीतिचकद्रुइतिश्वगतौनाष्यतेर्द्रातीतिग

© Dharmartha Trust J&K. Digitized by eGangotri

त्तिकुसनाःकद्रातीतिद्रातिकुसनाश्चकद्रातिकद्रातीतिसतो॥नर्पाकाःस्यासस्त्वदास्मिन्सी
तिविश्वकद्रूःकल्याणवर्णरूपःकल्याणवर्णस्येवास्यरूपंकल्याणंकमनीयंभवतिवर्णो
वृणोतेःरूपंरोचतेरेवंतद्धितसमासान्निर्ब्रूयान्नैकपदानिनिर्ब्रूयान्नावैयाकरणायना
नुपसन्नायानिदंविदेवानित्यंह्यविज्ञातुर्विज्ञानेऽसूयोपसन्नायतुनिर्ब्रूयाद्योवालंवि
ज्ञातुंस्यान्मेधाविनेतपस्विनेवाविद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टे
ऽहमस्मिअसूयकायानृजवेयतायनमाब्रूयावीर्यवतीतथास्यांयआतृणत्त्यवितथेन

© Dharmartha Trust J&K. Digitized by eGangotri

कर्णावृद्धुः खं कुर्वन्नमृतं संप्रयच्छन्। तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह। अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्। यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्। यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति। निधिः शेवधिरिति। ॥ ९ ॥ यथा। पादः। ॥ अथातो नुक्रमिष्यामो गोरिति पृथिव्या नामधेयं यद्दूरं गता भवति यच्चास्यां भूतानि गच्छन्तीति गातेर्वौकारो नामकरणः। ॥ ५ ॥ अपि पशुनामेह भवत्येतस्मादेवा ॥ ६ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्र

पापस्यां ताड्डितेनस्त्र चंनिगमाचवंतिगोत्तिः श्रीणीतमस्सरमितिपयसोमस्सरः सोमो मंदतेस्त्रघिकर्मणोमस्सरइतिसोसनामाग्निमत्तएनेनधनंस्रवतिपयःपिबतेर्वाप्याय तेर्वाक्षीरंक्षरतेर्वघ्रसेर्वरोनामकरणउशीरमितियधाश्रश्रुंदुहन्तोऽध्यासतेगवीम घिषवणचर्मणोंशुःशमष्टमात्रोसवत्यनेनायशंस्रवतीतिवानर्मचरतेर्वाच्छिन्नस्रवती तिवापापिचर्मचश्लेष्मानांगोत्तिःसन्नद्धापततिप्रसूतेतीषुस्सुतोज्यापिगोरुच्यते गव्याचेत्ताड्डितमपचेन्नगव्यागमयतीषूनितिाघृट्टेघृट्टेनियताभीमयत्रौस्तावे ।गोत्तिःसंनद्धोग्निर्वीनयसोतिरश्रसुनाव पापिस्यावंच श्लेष्मा वांर

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रिव

१८

18

यः प्रपतान्नूरूषादः॥ इष्टेइष्टे धनुषिधनुषि इष्टः क्षिप्रः श्वनान्नियतामीमय शब्दं करोति

मीमयतिः शब्दकर्मणः॥ तो वयः प्रपतन्ति पुरुषानदनाय॥ विरिति शकुनिनाम वेतेर्गतिक

र्मणो॥ऽपि पापीषु नाम इहस्तच स्यैतस्मादेवा॥ आदित्योऽपि पिङ्गो रुच्यते॥ उतादः परुषे गवि॥ पर्ववति

नास्वती त्योपमन्यवो॥ऽपि प्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते॥ तदेतेनोपेक्षितव्यमादि

त्यतोऽस्य दीप्तिर्भवतीति॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वइत्यपि निगमो भवति॥ सो

ऽपि गौरुच्यते॥ अत्राह गोरमन्वत इति॥ तदुपरिष्टाद्व्याख्यास्यामः॥ सर्वेऽपि रश्मयो गाव

© Dharmartha Trust J&K. Digitized by eGangotri

19

उच्यते। ता। तावां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः। अत्राह तदुरुगायस्य
वृष्णः परमं पदमवभाति भूरि। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो बहु
शृंगा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृंगं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा
शरणायोद्गतमिति वा शिरसो निर्गतमिति वा। अयासो ऽयनाः तत्र तदुरुगायस्य विष्णोर्म
हागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृ
तिः प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येवमन्येषामपि सत्वानां संदे १८।

© Dharmartha Trust J&K. Digitized by eGangotri

रू विघंते॥ नानि चेत्समानकर्माणि समाननिर्वचनानि॥ नानाकर्माणि चेन्नानानिर्वचनानि॥ य-

थार्थं निर्वक्तव्यानी॥ तीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रांतानि॥ तत्र निर्ऋत्तिर्निरमणात्॥

ऋच्छतेः कृच्छ्रापत्तिरितरा॥ सा पृथिव्या संदिह्यते॥ तयोर्विभागस्तस्या एषा भवति॥

य ईं चकार न सो अस्य वेद॥ य ईं ददर्श हिरुगिन्नु तस्मात्॥ स मातुर्योना परिवीतो अंतर्ब-

हुप्रजा निर्ऋतिमा विवेश॥ बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः॥ वर्षकर्मेति नैरु-

क्ताः॥ य ईं चकारेति करोति किरती संदिग्धौ वर्षकर्मणा॥ न सो अस्य वेद मध्यमः॥ स एवा

© Dharmartha Trust J&K. Digitized by eGangotri

स्ववेदमध्यमोयोददर्शादित्योपहितंसमातुर्योनोमातांतरिक्षंनिमीयंतेस्मिन्भूतानियो
निरंतरिक्षंमहानवयवः परिवीतोवायुनायमर्पीनरोयोनिरेतस्मादेवपरियुतोस्त्व
तिबकुघनाभूमिमापघतेवर्षकर्मणाशाकपूणिःसंकल्पयांचक्रेसर्वादेवताजाना
मीतितस्मैदेवतोभयलिंगाग्रादुर्बभूवतान्नजज्ञेतांग्रपच्छाविविदिषाणि सातिसा
स्माएतामृचमादिदेशैषामहेवतेति॥४॥ अयंसशिंकृयेनगोम नीवृत्ताममिमातिमायु
घसनायधिंश्रितासाविश्निसिनिर्हिंचकारमर्त्यविघ्नइवंदीप्रतिव्रीमोस्तनंअयंस २०।

शब्दायते येन गौरश्चिप्र इत्तत्रां॥मिमाति मायुं शब्दं करोति॥मायुमित्यादित्यमिति वा॥वागेषा

माध्यमिका ध्वंसने मेघेषु धिश्रित्॥साविद्धिसिर्निकरोति मर्त्यविद्युद्वं वंतीप्रत्यूहते व क्रि

वध्रिरिति निरूपनाम पहाणो वीति सत्तो॥वर्षणप्रच्छायाय पृथिवी तत्पुनरादत्ते॥पादद्वितीयःसमा

प्तः॥ हिरण्यनामान्युत्तराणि पंचदश॥हिरण्यं कस्मात् ध्रियत आयम्यमानमिति वा॥

ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा॥हर्यते वो स्यात्प्रेप्सा कर्मणोऽन्तरि

क्षनामान्युत्तराणि षोडश॥अंतरिक्षं कस्मादन्तराक्षान्तं भवत्यंतरमे इति वा शरीरेष्वं

© Dharmartha Trust J&K. Digitized by eGangotri

शां

तरिक्षयमितिवा ॥ तत्रसमुद्र इत्येतत्पार्थिवेनसमुद्रेणसंदिह्यते ॥ समुद्रः कस्मात्समुद्रवं

त्यस्मादापः समभिद्रवंत्येनमापः समोदंतेस्मिन्भूतानिसमुद्रकोभवतिसमुनत्तीति

वा ॥ तयोर्विभागस्तत्रेतिहासमाचक्षते ॥ देवापिश्चार्ष्टिषेणः शंतनुश्चकौरव्यो भ्रातरौब

भूवतुः सशंतनुः कनीयानभिषेचयां चक्रे ॥ देवापिस्तपः प्रतिपेदे ॥ ततः शंतनोराज्ये

द्वादशवर्षाणिदेवोनववर्ष ॥ तमूचुर्ब्राह्मणाअधर्मस्त्वयाचरितोज्येष्ठं भ्रातरमंत

रित्याभिषेचितं ॥ तस्मात्तेदेवोनवर्षतीति ॥ सशंतनुर्देवापिंशिशिक्षराज्येन ॥ तमुवाच

२११

© Dharmartha Trust J&K. Digitized by eGangotri

देवापिः पुरोहितस्ते स्मा नियाऊ याति नित्यो ति तस्यैतद्वर्षकामसूक्तं तस्यैषा भवति ॥१॥ आ
र्ष्टिषेणो होत्रमृषिर्निषीदं देवापिर्देवसुमतिं चिकित्वान् । स उत्तरस्मादधरं समुद्रमपो
दिव्या असृजद्वर्ष्या अभि ॥ आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा स
मानगतिर्वा पुत्रः पुरु त्रायते निपरणाद्वा पुन्नरकं ततस्त्रायत इति वा होत्रमृषिर्निषी
द ऋषिर्दर्शनात् स्तोमान्ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यान
र्षत्त ऋषीणामृषित्वमिति विज्ञायते देवापिर्देवानामाप्त्या स्तुत्या च प्रदानेन च देवसु

© Dharmartha Trust J&K. Digitized by eGangotri

मतिं देवानां कल्याणीमतिं विकिहां श्वेतनावान्।स उत्तरस्मादधरं समुद्रा उत्तर उद्
ततस्ते न वस्तं धरो घोरो धान धावतीत्यूर्द्ध्वं गति: प्रतिषिद्धा तस्योत्तरा सूयस्ते निर्वचनाय॥१॥
यद्देवापि: शंतनवे पुरोहितो होत्राय वृत: कृपयन्दीध्यत्। देवश्रुतं वृष्टिवनिं रराणो
बृहस्पतिर्वाचमस्मा अयच्छत्॥ शंतनु: शंतनोस्त्विति वा शमस्मै तन्वा अस्त्विति वा पुरोहि
त:पुर एनं दधति होत्राय वृत: कृपायमाणोऽन्वध्यायद्देवश्रुतं देवा एनं शृण्वन्ति वृष्टिया
चिनं रराणो रातिरस्य स्तोत्रं बृहस्पतिर्ब्रह्मासीत्सोऽस्मै वाचमयच्छद् बृहद् उपव्याख्यातं॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

तृतीयः पादः॥ साधारणान्युत्तराणि षड्दिवश्चादित्यस्य च यानि त्वस्य प्राधान्येनोपरिष्टात्ता
नि व्याख्यास्याम आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादि
तेः पुत्र इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक्सूर्यमादितेयमन्यासामपि देवता
नामादित्यप्रवादाः स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्ये
त्यथापि मित्रावरुणयोः। आदित्या दानुनस्पती। दानपती। अथापि मित्रस्यैकस्य प्र स मि
त्रमर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेनेत्यपि निगमो भवति। अथापि वरुणस्यै

© Dharmartha Trust J&K. Digitized by eGangotri

कस्मा अपां वृयमादित्यवृत्ते तयो व्रतमिति कर्मनाम निवृत्तिकर्म वारयतीति सतः इदमपीत
रद्व्रतमेतस्मादेव वृणोतीति सतो ऽन्नमपि व्रतमुच्यते यदावृणोति शरीरं॥१॥ स्वरादित्यो भ
वति सुअरणः सुईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वै तेन द्यौर्व्याख्याता॥
पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्प्रष्टा रसान् संस्प्रष्टा भासं ज्योतिषां
संस्पृष्टो भासेति वा॥५॥ घोः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च॥१॥ नाक आदित्यो भवति
नेता भासां ज्योतिषां प्रणयो॥५॥ घोः कमिति सुखनाम तत्प्रतिषिद्धं प्रतिषिद्ध्येत न वा अ

© Dharmartha Trust J&K. Digitized by eGangotri

मुंलोकंजग्मुषेकिंवनाकं।नवाअमुंलोकंजग्मुषेकिंवनासुखंपुण्यकृतोह्येवतत्रगच्छंति।४।
गौरादित्योभवतिगमयतिरसान्गच्छत्यंतरिक्षे।थद्यौर्यत्पृथिव्याअधिदूरंगताभवतियच्चा
स्यांज्योतींषिगच्छंति।पाविष्टवादित्योभवत्याविष्टोरसान्।आविष्टोभासंज्योतिषाम्।आविष्टो
भासेतिवा।थद्यौः।आविष्टाज्योतिर्भिःपुण्यकृद्भिश्चाद्दानन्नक्षआदित्योभवतिनेताभासां
ज्योतिषांप्रणवोऽपिवाभनएवस्याद्दीप्तीतोनन्नातीतिवैनेनद्यौर्व्याख्याता।७।वरु
र्पःपादः। रश्मिनामान्युत्तराणिपंचदश।रश्मिर्यमनात्।तेषामादितःसाधारणानि

© Dharmartha Trust J&K. Digitized by eGangotri

क्रि॰ द

पंचाश्वरश्मिन्निर्दिङ्मान्युत्तराण्यमहत्वो दिशः कस्माद्दिशा तेरासदनादपि वाम्यशानान्त
त्रकाष्ठा इत्येतदनेकस्यापि सत्वस्य वर्तते काष्ठा दिशो न वर्तते क्रान्त्वा स्थिता न वर्तते का
ष्ठा उपदिशो न वर्तीतरेतरं क्रान्त्वा स्थिता न वर्त्यादित्योपि काष्ठोच्यते क्रान्त्वा स्थितो न
वर्त्यो अन्तोपि काष्ठोच्यते क्रान्त्वा स्थितो न वर्त्यापोपि काष्ठा उच्यते क्रान्त्वा स्थिता न वर्तन्ती
ति स्थावराणाम्॥१॥ अतिष्ठन्ती नाम निवेशनानां काष्ठानां मध्ये निहितं शरीरं। वृत्रस्य नि
ण्यं विचरन्त्यापो दीर्घन्तम आशयदिन्द्रशत्रुः॥ अतिष्ठन्ती नाम निविशमानानामित्यस्थाव

२५॥

© Dharmartha Trust J&K. Digitized by eGangotri

शातयिता वा २

वराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निर्णामं वि

वरं तिविजानंत्यापः इति दीर्घं द्राघतेस्तमस्तनोतेराशायदाशायतेरिंद्रशत्रुरिंद्रोस्य शमयि

ता वा तस्मादिंद्रशत्रुस्तत्को वृत्रो मेघ इति नैरुक्ताः अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्ष

कर्म जायते तत्रोपमार्थेन युद्धवर्णा भवंत्यहिवत्तु खलु मंत्रवर्णा ब्राह्मणवादाश्च विवृद्ध्या

शरीरस्य स्रोतांसि निवारयांचकार तस्मिन्हते प्रसस्यंदिर आपः स्तदभिवादिन्येषर्ग्

भवति दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपां बिलम

© Dharmartha Trust J&K. Digitized by eGangotri

पिहितं यदासीत्॥ वृत्रं जघन्वाँ अप तद्ववार। दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदा
सयति कर्माणि॥ अहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यन्तरिक्षे॥ अयमपीतरोऽहि
रेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग्भव
ति पणिः पणनाद्वणिक्पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बि
भर्त्तेः॥ वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा॥ यदवृणोत्तद्वृत्रस्य वृत्रत्वमि
ति विज्ञायते॥ यदवर्द्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते॥१॥ पंचमः पादः। रात्रिनामान्यु २५

यदवर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते।

© Dharmartha Trust J&K. Digitized by eGangotri

त्राणि त्रयोविंशतीरात्रिः कस्मात्प्ररमयति भूतानि नक्तंचारीण्युपरमयतीतराणि ध्रु
वीकरोति रातेर्वास्याद्दानकर्मणः प्रदीयन्तेस्यामवश्यायाउषोनामान्यत्तराणि षोडशो
षाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति ॥ २ ॥ इदं श्रेष्ठं ज्योतिषां ज्योति
रागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा यथा प्रसूता सवितुः सवाय एवा रात्र्युषसे योनिमा
रैक् ॥ २ ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा
प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं स्त्रीयोनिररि

© Dharmartha Trust J&K. Digitized by eGangotri

सुतए नां गर्नीं स्तस्याः एषा परा न वर्त्तिः ॥ रुशद्वत्सा रुशती श्वेत्यागात् आरैगु कृष्णा सदनान्यस्याः ।
समानबंधू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ रुशद्वत्सा सूर्यवत्सा रुशदिति वर्ण
नाम स्यो वत्स उच्यते संसरति कर्मणः ॥ सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा ॥ रुशती श्वेत्या
गात् ॥ श्वेत्या श्वेततेः ॥ अरिचत् कृष्णा सदनान्यस्याः ॥ कृष्णवर्णा रात्रिः ॥ कृष्णं कृष्यतेर्निकृष्टो
वर्णः ॥ अथैनं संस्तौति समानबंधू समानबंधने ॥ अमृते अमरणधर्माणौ ॥ अनूची इतीत
रेतरमभिप्रेत्य द्यावा वर्णं चरतः ॥ ते एव द्यावौ द्योतनात् ॥ अपि वा द्यावा चरतस्तया सह चरत इति

© Dharmartha Trust J&K. Digitized by eGangotri

स्या॥८॥दाभिमानेनान्योन्यस्याध्यात्मं कुर्वाणे ॥ अहर्नामाण्युत्तराणि द्वादश ॥९ अहः ॥ कस्मादुपाहरं

त्यस्मिन्कर्माणि ॥ तस्यैष निपातो भवति वैश्वानरीयायामृचि ॥ अहश्च कृष्णमहरर्जुं

नं च विवर्तेते रजसी वेद्याभिः ॥ वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥

अहश्च कृष्णं रात्रिः ॥ शुक्लं चाहरर्जुनं ॥ विवर्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभि ॥

वैश्वानरो जायमान इवोद्यन्नादित्यः ॥ सर्वेषां ज्योतिषां राजा ॥९ वाहन्नग्निर्ज्योतिषा तमांसि ॥ मेघ

नामान्युत्तराणि त्रिंश ॥ न्मेघः ॥ कस्मान्मेहतीति सतः ॥ आ उपर उपल इत्येतान्यां ॥ साधार

© Dharmartha Trust J&K. Digitized by eGangotri

णानिपर्वतनामासि॥ रूपरउपसोमेघोभवत्सुपरमे॥उ तस्मिन्नत्राएष्कपरताश्रोपइतिवातेषाम
घाभवतिाष्ठादेवानांमानेत्रपमात्रेतिष्ठं॥ क्रंतत्रादेषामुपराउदायनात्रयस्तपंतिपृथि
वीमनूपाद्धाहृबूकंवहतःपुरीषांदेवानांनिर्माणेत्रपमात्रेतिष्ठ॥ साध्यामिकादेवगणाः
त्रपमरइतिमुख्यनामत्र॥ मोभवति॥ विकर्तनेनमेघानामुदकंजायते॥ त्रयस्तपंतिपृथि
वीमनूपाः॥ पर्जन्योवायुरादित्यः॥ शीतोष्णवर्षैरोषधीःपाचयंत्य॥ नूपात्रनुवपंतिलोकान्स्व
नस्वेनकर्मणा॥ यमपीतरसोनूपए तस्माद्देवानूप्यतउदकेनापिवात्वाबिलिस्यांघपात्रा

© Dharmartha Trust J&K. Digitized by eGangotri

गिरिस्तस्यानूप इति स्याद्धर्षा श्रीनामितो द्वाभ्यां बृबूकं वर्हतः पुरीषं वायुर्वादित्या उदकं बृ
बूकमित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंशतेर्वा पुरीषं पृणातेः पूरयतेर्वा ॥ षष्ठः पादः ॥
॥ वाङ्नामान्युत्तराणि सप्तपञ्चाशत्तद्द्वाकूस्माद्वक्त्वेत्तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च
निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतन्नदीवत् ॥ इयं शुष्मेभिर्बिसखा
इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ॥ पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा
विवासेम धीतिभिः ॥ इयं शुष्मैः शोषणैः शुष्ममिति बलनाम शोषयतीति सतो बिसं बिस्य

© Dharmartha Trust J&K. Digitized by eGangotri

निक

तिर्र्दनकर्मणो॥ ऋद्धिकर्मणो॥ वासानुसमुछ्रितं भवति॥ समुन्नुन्नमिति वा॥ महद्भिरूर्मिभिः॥ पा
रावतघ्नी पारावारघातिनी॥ पारं परं भवत्य॥५ वारमवरं॥५ मंदनायस्तुवते सुवृक्तिभिः॥ स्तुतिभिः॥ सर
स्वतीकर्मभिः परिचरे॥ मोदकनामान्युत्तराण्येकशत॥ मुदकं कस्मा॥ दुनत्तीति सतो॥ नदी
नामान्युत्तराणि सप्तत्रिंशन्॥ नद्यः कस्मा॥ न्नदना भवंतीति शब्दवत्यो॥ बहुलमासां नैघंटुकं वृत्त॥५॥ मा
श्चर्यमिव प्राधान्येन॥ तत्रेतिहासमाचक्षते॥ विश्वामित्र ऋषिः॥ सुदासः पैजवनस्य पुरोहितो
बभू॥ व विश्वामित्रः सर्वमित्रः॥ सर्वं संसृतं॥ सुदाः कल्याणदानः॥ पैजवनः पिजवनस्य पुत्रः॥ पि

28

२८

© Dharmartha Trust J&K. Digitized by eGangotri

ऊवनः पुनः स्पर्द्धनीय ऊयो वा॥ऽमे श्री नावगातिर्वा॥ऽसवितेगृह्णीत्वा विपादृक्षुऊग्रो ऽसं नेदमायया॥

ऽवनुययुरितरे॥ऽसविश्वामित्रोनदीस्तुष्टावगाधा॥ऽनवने॥ऽस्यपिद्विवः रपिबकुवन्नेघद्विवदुप

रिष्टान्नद्यास्यास्यामा॥ऽयेतद्वकुवतासारमध्यमेववसे सोम्यायरूच्यावरीरूपमुहूर्त्तमेवैः॥

प्रस्निधुमच्छा वृहतीमनीषामवस्युरह्वकुशिकस्य सूनुः॥ उपरमध्यमेववसे सोम्यायसोम

सं पादिनरूत्वावरीरूतवत्यरूतमित्युदकनामप्रत्यन्तंसवन्तिमुहूर्त्तमेवैरयनेरवनैर्वा॥मु

हूर्त्तोमुकूरूरूऊरूऊरवेगतिकर्मणो॥मुकुर्मुहुरुरवकालोयावदन्तीदन्हे वे॥ऽस्यनीदहमसि हरणं

© Dharmartha Trust J&K. Digitized by eGangotri

नवतिरर्हणः हृणीतेः प्रसृतः कालः कालः कालयतेर्गतिकर्मणः श्रासिंधुं
महत्यां मनीषया मनसः ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशिको राजा बभू
व क्रोशतेः शब्दकर्मणः कंशतेर्वा स्यात् प्रकाशयतिकर्मणः साधु विक्रोशयिता र्थानामिति
वा नघं प्रसूनुत्रा ३ इंद्रो अस्मां अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनां देवो नयतु स
विता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥ इंद्रो अस्मानरदद्वज्रबाहुः रदतिः खनतिकर्मा
पाहन्वृत्रं परिधिं नदीनामिति व्याख्यातं देवो नयतु सविता सुपाणिः कल्याणपाणिः पाणिः

© Dharmartha Trust J&K. Digitized by eGangotri

पणायतेः पूजाकर्मणः ॥ अगृह्य पाणी देवानूं ऊयं तिोतस्य वयं प्रस्तवेयाम उर्वीः ॥ ३ ॥ उर्व्यै ऊर्णोमी
द्विणो नोरिस्यो र्णीवान्नः ॥ अस्माख्यायां ततन्वा शुश्रुवुः ॥ ४ ॥ आ ते कारो शृणवामा वचांसि यया
थ दूरादनसा रथेन ॥ नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ आ शृणवाम ते
कारो वचनानि याहि दूरादनसा च रथेन च ॥ नि नमाम ते पाययमानेव योषा पुत्रं मर्याये
व कन्या परिष्वङ्गनाय ॥ निनमा इति वा ॥ श्वनामान्युत्तराणि षड्विंशतिः ॥ तेषामष्टा उत्तरा
णि बहुवत् ॥ अश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा ॥ तत्र दधिका इत्येतद् दधत्क्राम

© Dharmartha Trust J&K. Digitized by eGangotri

तीति वा दधत्क्रंदतीति वा दधद्राकारी भवतीति वा॥ तस्याश्ववद्देवतावच्च निगमा भवंति॥ तद्यद्दे
वतावदुपरिष्टात्तद्व्याख्यास्यामो॥ अथैतदश्ववत्॥ आप उ तस्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो
अपिकक्ष आसनि॥ क्रतुं दधिक्रा अनु संतवीत्वत्॥ पथामंकांस्यन्वापनीफणत्॥ अपि स वा
जी वेगेन वाजी क्षेपणमनु तूर्णमश्नुते ध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वा
पिकक्ष आसनीति व्याख्यातं॥ क्रतुं दधिक्राः कर्म वा प्रज्ञां वा अनु संतवीत्वत्तनोतेः पू
र्वया प्रकृत्या निगमः॥ पथामंकांसि पथां कुटिलानि॥ पंथाः पततेर्वा पद्यतेर्वा पंथतेर्वा॥ अंकोंचतेः॥

रापनीफणादितिफणातेश्वर्केरीतन्नैंदशोत्तराण्यादिष्टोपयोजनानीत्याचक्षतेसादम
र्यन्नानायज्ञसतिकर्मीणउत्तरेधातवएकादशान्नावेल्मेबोत्तराणिज्वलनोनामधेयानि
नामधेयानि॥३६॥समःपादः॥द्वितीयोध्यायः॥ ७६ ॥ कर्मनामान्युत्तराणिषड्विंश
तिःकर्मकस्मात्क्रियतइतिसतोपत्यनामान्युत्तराणिपंचदशापत्यंकस्माद्पततेन
वतिनानेनपततीतिवातद्यथाजनयितुःप्रजैवमर्थीयेऋचावुदाहरिष्यामः॥१॥परिष
द्यसरणस्यरेक्णोनित्यस्यरायःपतयस्यामानशेषोअग्नेनजातमस्त्यचेतानस्यमापथो

त्रस्य

© Dharmartha Trust J&K. Digitized by eGangotri

विद्वेषः। परिहर्त्तव्यहिनोपसर्त्तव्यमरणस्यरेकहोरणापार्ण्णनवतिरिकेरूइतिधननामारि
ष्यंतेप्रयत्नोनित्यंस्यरायःपत्तयस्यामापिच्यस्यैवंधनस्यानश्येत्त्रैत्रन्यऊतमस्ति।शेष
इत्यपत्यनामघोष्यते।प्रयत्नोवैतयमानस्यतत्प्रमत्तस्यनवतिमानःपणोविद्वेषइति
तस्योत्तरासूयसेनिर्धनायारानहिय्यतायारणः।सुशेवोन्योदर्योमनसामंतवा
उात्रधाविद्वेकःपुनरिक्तएत्योनोवाऊयंनीषालेडुनयः।नहियहीतव्योत्ररणः
सुसुखतमोपन्योदर्योमनसापिनमंतव्योममायमिलं१सउुकःपुनरेवतद्देति

© Dharmartha Trust J&K. Digitized by eGangotri

यतआगतोनवत्यौकइतिनिवासनामोच्यतेएतुनोवाऊीचेऊनवानेतिषद्दमाणाःसपत्नी
न्नवऊातःसएवपुत्रइत्यपेतांदुहितृदायाघउदाहरंतिपुत्रदायाघेइत्येकेऽशासद्वह्निर्दु
हितुर्नप्त्यंगाद्विद्वाँऋतस्यदीधितिंसपर्यन्।पितायत्रदुहितुःसेकंप्रऊञ्जन्संशग्म्येनमन
सादधन्वे।प्रशास्तिवोल्हासंतानकर्मणेदुहितुःपुत्रभावंदुहितादुर्हितादूरेहितादोग्धे
र्वानप्तारमुपागमद्दौहित्रंपौत्रमितिविद्वान्प्रऊननयज्ञस्यमातरिप्रयतस्यविधानंपू
ऊयन्नविशेषेणमिथुनाःपुत्रादायादाइतिनदेनद्रक[illegible]श्लोकाभ्यामभ्युक्तः।अंगादं
रतसोवा।अंगादंगात्संभूतस्यहृदयादधिजातस्य।र

© Dharmartha Trust J&K. Digitized by eGangotri

गात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यविशेषे
ण पुत्राणां दायो भवति धर्मतः। मिथुनानां विसर्गादौ मनुः स्वायंभुवोऽब्रवीत्। न दुहि
तर इत्येके तस्माद्वै स्त्रियं जातां परास्यंति न पुमांसमिति च स्त्रीणां दानविक्रया
तिसर्गा विद्यंते न पुंसः। पुंसोऽपीत्येके शौनःशेपे दर्शनात्। अभ्रातृकाप्रमतीवाद इत्सपर।
अभ्रातर इव योषास्तिष्ठंति हृतवर्त्मनः। अभ्रातृका इव योषास्तिष्ठंति संतानकर्म
णे पिंडदानाय हृतवर्त्मान इत्यभ्रातृकायाश्च निर्वाहः अपमिकस्त्वस्यां नरा नूयुसे
पुमांदायादोऽदायादा स्त्री इति विज्ञायते तस्मात्। ३३

स्त्री

© Dharmartha Trust J&K. Digitized by eGangotri

ते२

निर्वचनायाभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानां। जायेव पत्य उशती

नि २ सुवासा उषा हस्रेव नि रिणीते अप्सः। अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी संतानकर्मणे पिं

डदानाय न पतिं गर्त्तारोहिणीव धनलाभाय दाक्षिणाजी। गर्त्तः सभास्थाणुः गृणातेः

सत्यसंगरो भवति। तं तत्र यापुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नंति सा रिक्थं

लभते। श्मशानसंचयोपि गर्त्त उच्यते गुरतेरपगूर्णो भवति। श्मशानं श्मशयनं श्म शा

रीरं। शरीरं शृणातेः शम्नातेर्वा। श्मश्रु लोम श्मनि श्रितं भवति। लोम लुनातेर्वा लीय

© Dharmartha Trust J&K. Digitized by eGangotri

यत्ते वो॥ नीपरस्याविष्कुयो॥ घदुप रस्याविष्कुयो॥ ऊर्त्तेष्ठास्यास्त्रमायुको यजमान इत्यपि नि
